# Apsarobhih Kritam Naranarayana Stotram

# અપ્સરોભિઃ કૃતમ્ નરનારાયણસ્તોત્રમ્

## Document Information

Text title : Apsarobhih Kritam Naranarayana Stotram

File name : naranArAyaNastotraMapsarobhiHkRRitam.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Vishnudharma Upapurana. Adhyaya 103

Latest update : December 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# અપ્સરોભિઃ કૃતમ્ નરનારાયણસ્તોત્રમ્

અપ્સરસ ઊચુઃ -
પશ્યામ નાદિં તવ દેવ નાન્તં ન મધ્યમવ્યાકૃતરૂપપારમ્ ।
પરાયણં ત્વા જગતામનન્તં નતાઃ સ્મ નારાયણમાત્મભૂતમ્ ॥ ૧૬॥

મહી દિવં વાયુજલાગ્નયસ્ત્વં શબ્દાદિરૂપશ્ચ પરાપરાત્મન્ ।
ત્વત્તો ભવત્યચ્યુત સર્વમેતદભેદરૂપોઽસિ વિભો ત્વમેભિઃ ॥ ૧૭॥

દ્રષ્ટાસિ રૂપસ્ય રસસ્ય વેત્તા શ્રોતા ચ શબ્દસ્ય હરે ત્વમેકઃ ।
સ્પ્રષ્ટા ભવાન્સ્પ્રશવતોઽખિલસ્ય ઘ્રાતાસિ ગન્ધસ્ય પૃથક્શરીરી ॥ ૧૮॥

સુરેષુ સર્વેષુ ન સોઽસ્તિ કશ્ચિન્મનુષ્યલોકે ચ ન સોઽસ્તિ કશ્ચિત્ ।
પશ્વાદિવર્ગે ચ ન સોઽસ્તિ કશ્ચિદ્યો નાંશભૂતસ્તવ દેવદેવ ॥ ૧૯॥

બ્રહ્માદ્યુપેન્દ્રપ્રમુખાનિ સૌમ્યેષ્વિન્દ્રાગ્નિરૂપાણિ ચ વીર્યવત્સુ ।
રુદ્રાન્તકાદીનિ ચ રૌદ્રવત્સુ રૂપેષુ રૂપાણિ તવોત્તમાનિ ॥ ૨૦॥

સમુદ્રરૂપં તવ ધૈર્યવત્સુ તેજસ્વિરૂપેષુ રવિસ્તથાગ્નિઃ ।
ક્ષમાધનેષુ ક્ષિતિરૂપમગ્ર્યં રૂપં તવાગ્ર્યં બલવત્સુ વાયુઃ ॥ ૨૧॥

મનુષ્યરૂપં તવ રાજસેષુ મૂઢેષુ સર્વેશ્વર પાદપોઽસિ ।
દર્પાન્વિતેષ્વચ્યુત દાનવસ્ત્વં સનત્સુજાતશ્ચ વિવેકવત્સુ ॥ ૨૨॥

રસસ્વરૂપેણ જલે સ્થિતોઽસિ ગન્ધસ્વરૂપો ભવતો ધરિત્ર્યમ્ ।
દૃશ્યસ્વરૂપશ્ચ હુતાશને ત્વં સ્પર્શસ્વરૂપો ભગવાન્સમીરે ॥ ૨૩॥

શબ્દાત્મકં તે નભસિ સ્વરૂપં મન્તવ્યરૂપો મનસિ પ્રભો ત્વમ્ ।
બોધવ્યરૂપશ્ચ વિભો ત્વમેકઃ સર્વત્ર સર્વેશ્વર સર્વભૂતઃ ॥ ૨૪॥

પશ્યામ તે નાભિસરોજમધ્યે બ્રહ્માણમેતં ચ હરં ભ્રુકૂટ્યમ્ ।
તત્રાશ્વિનૌ કર્ણગતૌ સમસ્તાણવસ્થિતાન્બાહુષુ લોકપાલાન્ ॥ ૨૫॥

ઘ્રાણેઽનિલં નેત્રગતૌ રવીન્દૂ જિહ્વા ચ તે નાથ સરસ્વતીયમ્ ।

પાદૌ ધરિત્રીં જઠરં સમસ્તાંલ્લોકાન્હૃષીકેશ વિલોકયામઃ ॥ ૨૬॥

જઙ્ઘે વિયત્પાદકરાઙ્ગુલીષુ પિશાચરક્ષોરગસિદ્ધસઙ્ઘાન્ ।
પુંસ્ત્વે પ્રજાનાં પતિરોષ્ઠયુગ્મે પ્રતિષ્ઠિતાસ્તે ક્રતવઃ સમસ્તાઃ ॥ ૨૭॥

સર્વેષ્ટયસ્તે દશનેષુ દેવ દંષ્ટ્રાસુ વિદ્યા ભવતશ્ચતસ્રઃ
રોમસ્વશેષાસ્તવ દેવસઙ્ઘા વિદ્યાધરા નાથ કરાઙ્ઘ્રિરેખાઃ ।
સાઙ્ઘાઃ સમસ્તાસ્તવ દેવ વેદાઃ સમાસ્થિતા બહુષુ સન્ધિભૂતાઃ ॥ ૨૮॥

વરાહરૂપં ધરણીધૃતસ્તે નૃસિંહરૂપં ચ સટાકરાલમ્ ।
પશ્યામ તે વાજિશિરસ્તથોચ્ચૈસ્ત્રિવિક્રમે યશ્ચ તવાપ્રમેયઃ ॥ ૨૯॥

અમી સમુદ્રાસ્તવ દેવ દેહે મેર્વાદયઃ શૈલવરાસ્તવામી ।
ઇમાશ્ચ ગઙ્ગાપ્રમુખાઃ સ્રવન્ત્યો દ્વીપાન્યશેષાણિ વનાનિ ચૈવ ॥ ૩૦॥

સ્તુવન્તિ ચૈતે મુનયસ્તવેશ દેહે સ્થિતાસ્ત્વન્મહિમાનમગ્ર્યમ્ ।
ત્વામીશિતારં જગતામનન્તં યજ્ઞેશમર્ચન્તિ ચ યજ્વિનોઽમી ॥ ૩૧॥

ત્વત્તો ન સૌમ્યં જગતીહ કિઞ્ચિત્ત્વત્તો ન રૌદ્રં ચ સમસ્તમૂર્તે ।
ત્વત્તો ન શીતં ન ચ કેશવોષ્ણં સર્વસ્વરૂપાતિશયી ત્વમેકઃ ॥ ૩૨॥

પ્રસીદ સર્વેશ્વર સર્વભૂત સનાતનાત્મન્પરમેશ્વરેશ ।
ત્વન્માયયા મોહિતમાનસાભિર્યત્તેઽપરાદ્ધં તદિદં ક્ષમસ્વ ॥ ૩૩॥

કિં વાપરાદ્ધં તવ દેવ મૂઢૈર્યન્માયયા નો હૃદયં તથાપિ ।
પાપાવશં કિં પ્રણતાર્તિહારિન્મનો હિ નો વિહ્વલતા?મુપૈતિ ॥ ૩૪॥

ન તેઽપરાદ્ધં યદિ વાપરાદ્ધમસ્માભિરુન્માર્ગવિવર્તનીભિઃ ।
તત્ક્ષમ્યતાં સૃષ્ટિકરસ્તવૈવ દેવાપરાધં સૃજતો વિવેકાન્ ॥ ૩૫॥

નમો નમસ્તે ગોવિન્દ નારાયણ જનાર્દન ।
ત્વન્નામસ્મરણાત્પાપમશેષં નઃ પ્રણશ્યતુ ॥ ૩૬॥

તતોઽનન્ત નમસ્તુભ્યં વિશ્વાત્મન્વિશ્વભાવન
ત્વન્નામસ્મરણાત્પાપમશેષં નઃ પ્રણશ્યતુ
નમો નમસ્તે વૈકુણ્ઠ શ્રીવત્સાઙ્કાબ્જલોચન
વરેણ્ય યજ્ઞપુરુષ પ્રજાપાલક વામન
નમોઽસ્તુ તેઽબ્જનાભાય પ્રજાપતિકૃતે હરે ।
ત્વન્નામસ્મરણાત્પાપમશેષં નઃ પ્રણશ્યતુ ॥ ૩૭॥

સંસારાર્ણવપોતાય નમસ્તુભ્યમધોક્ષજ ।
ત્વન્નામસ્મરણાત્પાપમશેષં નઃ પ્રણશ્યતુ ॥ ૩૮॥

નમઃ પરસ્મૈ શ્રીશાય વાસુદેવાય વેધસે ।
સ્વેચ્છયા ગુણભોક્તૃત્વે સર્ગાન્તસ્થિતિકારિણે ॥ ૩૯॥

ઉપસંહર વિશ્વાત્મન્ રૂપમેતત્સમન્તતઃ ।
વર્ધમાનં ન નો દ્રષ્ટું સમર્થં ચક્ષુરીશ્વર ॥ ૪૦॥

પ્રલયાગ્નિસહસ્રસ્ય સમા દીપ્તિસ્તવાચ્યુત ।
પ્રમાણેન દિશો ભૂમિર્ગગનં ચ સમાવૃતમ્ ॥ ૪૧॥

ન વિદ્મઃ ક્વ નુ વર્તામો ભવાન્નૈવોપલક્ષ્યતે ।
સર્વં જગદિહૈકસ્થં પિણ્ડિતં લક્ષયામહે ॥ ૪૨॥

કિં વર્ણયામો રૂપં તે કિં પ્રમાણમિદં હરે ।
માહાત્મ્યં કિન્તુ તે દેવ જિહ્વાયા યન્ન ગોચરમ્ ॥ ૪૩॥

વક્ત્રાણામયુતેનાપિ બુદ્ધીનામયુતાયુતૈઃ ।
ગુણાનાં વર્ણનં નાથ તવ વક્તું ન શક્યતે ॥ ૪૪॥

તદેતદ્દર્શિતં રૂપં પ્રસાદઃ પરમઃ કૃતઃ ।
છન્દતો જગતામીશ તદેતદુપસંહર ॥ ૪૫॥

શૌનક ઉવાચ -
ઇત્યેવં સંસ્તુતસ્તાભિરપ્સરોભિર્જનાર્દનઃ ।
દિવ્યજ્ઞાનોપપન્નાનાં તાસાં પ્રત્યક્ષમીશ્વરઃ ।
વિવેશ સર્વભૂતાનિ સ્વૈરંશૈર્ભૂતભાવનઃ ॥ ૪૬॥

ઇતિ વિષ્ણુધર્મેષુ ત્ર્યધિકશતતમોઽધ્યાયાન્તર્ગતં અપ્સરોભિઃ કૃતં
નરનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Apsarobhih Kritam Naranarayana Stotram*

pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*